तेन ग्रहीतुमशक्यत्वात् अतोरजतापरोक्षव्यवहारो विलुप्तः स्यात्। यदि अन्येन केनचित् दुष्टकरणजन्यज्ञानेन तदुत्पादस्ततः स्वात्मकबुद्ध्या तद्ग्रहः स्यादित्यङ्गीक्रियते तदाऽतिप्रसङ्गः किञ्च दुष्टकरणजन्यज्ञानस्यैव तदुत्पादकत्वं वाच्यं तत्र करणस्य दुष्टत्वञ्च अर्थक्रियाकारिताशून्यविषयग्राहित्वेनैव तथा च असति रजते कथं करणस्य दुष्टत्व निर्णयः। अथ अदुष्टकरणजन्यज्ञानं तदुत्पादयति तदा तस्य घटादिवत् अर्थक्रियाकारित्वरूपसत्त्वसम्भवेन देशान्तरवर्त्तिरजतविषयकादविशेषः स्यात्। किञ्च रजतस्यानुत्पत्तौ न तस्य ज्ञानविषयता ज्ञानाकारार्पकतयैव विषयत्वस्य त्वया स्वीकारात् अनुत्पन्नस्य कथं ज्ञाने स्वाकारार्पकत्वसम्भवः। तस्मादात्मख्यातिपक्षे रजतमेव ज्ञानेन न प्रतीयेत।

एवमख्यात्यन्यथाख्यात्यात्मख्यातिपक्षेषु निरस्तेषु इदानीमसत्ख्यातिपक्षः वेदान्तिभिरभ्युपगतः आक्षेपपूर्व्वकं प्रदर्श्यते इदं रजतमिति ज्ञानं स्मृतिग्रहणाभ्यामन्यत् अध्यासनामकं ज्ञानं यत्र असतोऽनिर्वचनीयस्य उत्पन्नस्य रजतादेर्भानमीदृशं ज्ञानमसत्ख्यातिपदवेदनीयमस्ति। ननु ज्ञानस्य स्मृतिग्रहणाभ्यामन्यः प्रकारो न सम्भवति इति चेन्न किं विलक्षणसामग्र्यनिरूपणात् तदसम्भवः? उत विलक्षणज्ञानस्वरूपानिरूपणात्? उत विलक्षणविषयानिरूपणात्? नाद्यः संप्रयोगसंस्कारदोषाणामेव तत्सामग्रीतया कल्पनात् न च दोषस्य पूर्व्वप्राप्तकार्य्यानुदयं प्रत्येव हेतुत्वं न पूर्व्वकार्य्योदयं प्रतीति वाच्यं कार्य्यानुदयस्य तत्प्रागभावरूपतयाऽनादित्वे तत्र दोषहेतुत्वासम्भवात्। वातपित्तश्लेष्मणाञ्चापूर्व्वकार्य्योत्पादकत्वदर्शनाच्च न च दोषस्य संस्कारोद्बोधकत्वेनान्यथासिद्धिः तदुद्बोधस्य तद्व्यापारत्वात् न हि व्यापारेण व्यापारिणोऽन्यथासिद्धिरिति नियमात् नह्युत्पतननिपतने कुर्व्वन् कुठारः छिदिक्रियां प्रति अहेतुर्भवति। ननु इन्द्रियसंप्रयोगस्य इदन्तामात्रे सत्त्वात् रजतांशेऽसत्त्वात् इदन्ताबोधनेन तस्योपक्षीणत्वात् एवं संस्कारस्य स्मृतिमात्रजनकत्वनियमेन वेदान्तिमते अध्यासात्मकज्ञानस्य स्मृतित्वानङ्गीरात्, दोवस्य च स्वातन्त्र्येण ज्ञानहेतुत्वस्य कुत्राप्यदर्शनाच्च कथं रजतावभास इति चेत् उच्यते प्रथमं दोषसहितेनेन्द्रियेण इदन्तामात्रविषयाऽन्तःकरणवृत्तिर्जन्यते तत्र इदन्तायां तद्ग्राहकवृत्तौ च चैतन्यमभिव्यज्यते तच्चैतन्यनिष्ठा शुक्त्यविद्या च दोषवशात्संक्षुब्धा भवति तत्रेदमंशावच्छिन्नचैतन्यस्थाऽविद्या दोषेण क्षुभिता सती सादृश्याद्युद्बोधितसंस्कारवशात् रजताकारेण विवर्त्तते। वृत्त्यवच्छिन्नचैतन्यस्थाऽविद्या तु रजतग्राहिवृत्तिसंस्कारसहकृता वृत्तिरूपेण विवर्त्तते। तौ च रजततद्वृत्तिरूपविवर्त्तौ स्वाधिष्ठानेन साक्षिचैतन्येनावभास्येते इत्येवं रजतावभासः कल्प्यते। यद्यप्यन्तःकरणवृत्तिरविद्यावृत्तिश्चेति ज्ञानद्वयम् तथापि तद्विषयौ सत्यानृते इदंरजते अन्योन्यात्मकतामापन्नौ इति विषययोरैक्यात् वृत्तिद्वयस्यैक्यम् ततश्च विषयावच्छिन्नफलस्याप्येकत्वेन ज्ञानैक्यमुपपद्यते। एवं मिथ्याज्ञानतद्विषययोर्निरूपणेन द्वितीयतृतीयविकल्पौ निरस्तौ वेदितव्यौ। यद्यप्यन्यत्र संप्रयोगसंस्कारौ परस्परं निरपेक्षौ प्रमितिस्मृत्योर्जनने समर्थौ दृष्टौ तथापि क्रमेण स्मृतिप्रमित्योरुत्पत्तौ प्रवर्त्तकत्वानुपपत्तौ प्रवृत्त्यन्वयानुपपत्त्या ताभ्यां प्रत्यभिज्ञावदेकं विशिष्टं मिथ्याज्ञानं जन्यते इति कल्प्यते यथा नैयायिकादिभिः निरन्तरोत्पन्नेष्वपि वर्णज्ञानेषु यौगपद्याभावात् पदार्थज्ञानानुपपत्त्या पूर्व्वज्ञानजन्यसंस्कारसहितमन्त्यवर्णज्ञानमेव पदार्थबुद्धिहेतुत्वेन कल्प्यते तद्वत्। ननु विमतं ज्ञानं नैकं भिन्नकारणजन्यत्वात् रूपरसादिज्ञानवदिति चेत् न अनुमानप्रत्यभिज्ञानयोर्व्यभिचारात् उभयोरपि नानाकारणजन्यत्वात्। अनुमानं हि व्याप्तिज्ञानसंस्कारलिङ्गदर्शनपरामर्शजन्यम्। प्रत्यभिज्ञा च इन्द्रियसंप्रयोगसंस्काररजन्येति सर्व्वैरङ्गीक्रियते न च शुक्तौ अनिर्वचनीयस्य रजतस्योत्पत्तौ तस्य च शुक्तौ संसर्गात् कथं तस्य मिथ्यात्वमसत्त्वञ्च स्यादिति वाच्यम् सत्तात्रैविध्याङ्गीकारेण तत्र व्यावहारिकसत्ताशून्यत्वेनैव तस्य मिथ्यात्वस्य कल्पनात्। तथाहि सत्त्वं त्रिविधं पारमार्थिकं त्रैकालाबाध्यत्वरूपं यथा ब्रह्मणः। व्यावहारिकं ब्रह्मज्ञाननिवर्त्त्यम् यथा आकाशादेः प्रातीतिकम् अधिष्ठानज्ञाननिवर्त्त्यं यथा शुक्तिरजतादेः। न च मिथ्यात्वकल्पनं मानहीनम्" "अथ रथान् रथयोगान् पथः सृजते" इति श्रुतेः मिथ्यैवात्र रजतमभादिति रजततज्ज्ञानयोर्मिथ्यात्वप्रत्यभिज्ञानस्य च मानत्वात्। अतो मतान्तरवत् वेदान्तमते नानुभवविरोधोनिर्मूलत्वं वा। अख्यातिपक्षे अपरोक्षावभासिनः स्मर्य्यमाणत्वं विरुध्यते। ज्ञानद्वयपक्षे रजतस्य पारोक्ष्यं स्मृतौ स्मरणाभिमानमोषादिकम्, अन्यथाख्यातौ रजतस्य आपरोक्ष्यानुभवविरोधः आत्मख्यातिपक्षे विषयाभावेनापरोक्षावभासविरोधः"। प्रमेयविवरणसारांशः।

शुक्तिरजतादि ज्ञानदृष्टान्तेनज्ञाननिवर्त्त्यतया सर्व्वेषां घटपटादिज्ञानानामसत्ख्यातित्वं तद्विषयाणां वस्तु-